MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

The Concept and Varieties of Alaṅkāras in Sanskrit Literature

संस्कृतशास्त्रे अलंकाराणां स्वरूपं वैचित्र्यं च

Gour Bera

Research Scholar, Prabhat Kumar College
Vidyasagar University, Midnapore, West Bengal, India.
Email: gourbera1992@gmail.com
Page No: 112-119

Abstract: *This research paper presents a comprehensive historical and theoretical discourse on the evolution, essential nature (svarūpa), and diverse perspectives of alaṅkāras (figures of speech) in Sanskrit poetics (Alaṅkāraśāstra). Tracing their primordial roots from Vedic literature and epics to the formative treatise of Bharatamuni's Nāṭyaśāstra, the study examines the progressive conceptual shifts articulated by seminal rhetoricians across distinct literary epochs. It analyzes early formalist formulations by Bhāmaha, Daṇḍin, and Udbhaṭa, structural categorizations by Vāmana and Rudraṭa, and the profound paradigm shift initiated by Ānandavardhana, wherein ornaments transitioned into spontaneous auxiliaries subservient to aesthetic sentiment (rasa). Furthermore, the synthesis formulated in later masterworks—notably Mammaṭa's Kāvyaprakāśa, Viśvanātha's Sāhityadarpaṇa, and Paṇḍitarāja Jagannātha's Rasagaṅgādhara—is critically appraised. Ultimately, the paper highlights how alaṅkāras transcend mere verbal embellishment, functioning as vital stylistic instruments that heighten poetic charm (camatkāra), enrich figurative meaning, and actualize sublime aesthetic relish.*

Keywords: *Sanskrit Poetics, Alaṅkāra, Svarūpa, Rasa, Camatkāra.*

साहित्यशास्त्रे अलंकारशास्त्रस्य उद्भवः विषये , अपि च इतिहास-पुराण-दर्शन-व्याकरणादि शास्त्रेऽपि अलंकारशास्त्रस्य आविर्भावः विषये वर्णितः अस्ति। अलंकारशास्त्रसंज्ञायाम् 'अलंकारः'शब्दः सौन्दर्यवाचकः इति उच्यते। अलङ्काराः काव्यशरीरभूतयोः शब्दार्थयोः चमत्कारस्य सौन्दर्यस्य वा आधानं कुर्वन्ति। अलंकारशास्त्रपरम्परायां भरत-दण्डि-भामह-वामनोद्भट-रुद्रट-राजशेखर-आनन्दवर्धन-अभिनवगुप्त-धनञ्जय-कुन्तक-भोज-मम्मट-विश्वनाथ-अप्पयदीक्षित-जगन्नाथादयः सर्वे आलंकारिकाः तेषां अलंकारग्रन्थे अलंकारस्य स्वरुपं विषये अलोचितवन्तः।

संस्कृतसाहित्ये अलंकारशास्त्रस्य उद्भवः विकासश्च विषये वहव मतानि प्राचीनकालात् अद्यावधि प्रचलिष्यति। यस्मात् दिनादारम्भ भारतीयाः आर्याः कवित्वशक्तया अनुप्राणिता आसन् तस्मादेव दिनात् अलंकारशास्त्रस्य उत्पत्तिः भवति। सहितयोः भावः 'साहित्यम्'। शब्दार्थयो सम्बन्धेन साहित्यः आविर्भवति। 'साहित्य'शब्दस्य प्रयोगः संस्कृत काव्यालंकारग्रन्थेषु वहुधा परिदृष्टं भवति। अस्मिन् विषये भर्तृहरिणा कथितम् —

"साहित्यसङ्गीतकलाविहीनः साक्षात् पशुपुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमान स्तद्भागधेयं परमं पशुनाम्।।"[1]

अर्थात् 'साहित्य'शब्दः शब्दार्थयोः अनुरूप सन्निवेशार्थमेव अवगमयति। संस्कृतशास्त्रेषु अलंकारशास्त्रस्य अवदानं महत्वपूर्णं वर्तते। काव्ये यद्यपि रस-ध्वनि-गुण-दोषादयो वर्त्तन्ते तथापि अलंकारस्य प्राधानोऽपि वर्त्तते। यतः — "प्राधान्येन व्यपदेशो भवति"- इति न्यायेन अलंकारशास्त्रमिति निगद्यते। काव्यसौन्दर्यं प्रतिपादयितुं अलंकारशास्त्रस्य महत्वपूर्णं स्थानं वर्तते। अग्निपुराणे अलंकारशास्त्रस्य कालनिर्णयः विषये सन्दिग्धोऽस्ति। हरिषेणरचिते समुद्रगुप्तशिलालेखेऽपि तदानीमलङ्कारशास्त्ररचना प्रमाणं दृश्यते।

सुप्राचीनकालादेव संस्कृतालंकारिकैः साहित्ये अलंकाराणां गौरवयुक्तं स्थानम् दृश्यते। 'अलम्' इति अव्ययात् 'कृ' धातोः घञ् प्रत्ययेन अलंकारो शब्दः निष्पद्यते। 'अलङ्कारः' काव्यस्य सौन्दर्यं वर्धयति। साधारणार्थे 'अलङ्कारः' शब्दः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

काव्यशोभावर्द्धकः भवति। 'अलंकारः' हि नाम काव्यशोभाकरः धर्मः। काव्यं च शब्दार्थमयमिति प्रायः सर्वेषाम् आलंकारिकाणां सिद्धान्तः।

प्राचीनभारते खीष्टपूर्वकालादेव काव्यसमालोचनाशास्त्रं प्रचलितम् आसीत्। भरतप्रणीतं नाट्यशास्त्रं संस्कृतालंकारशास्त्रस्य प्राचीनतमः ग्रन्थः। ततश्च नवमशताब्दी यावत् अलंकारशास्त्रस्य प्रथमं पर्वं प्रकाशितम् आचार्याः — भामहोद्भटदण्डिवामनाः। द्वितीये पर्वणि आचार्याः आनन्दवर्धन-अभिनवगुप्त-भट्टनायक-महिमभट्ट-कुन्तकाः वर्तन्ते। तृतीये पर्वणि मम्मट-विश्वनाथ-जगन्नाथ-अप्पयदीक्षिताः वर्तन्ते।

अलंकारशास्त्रस्य प्राचीनता विषये वैदिकसाहित्ये दृश्यते। यथा – ऋग्वेदसंहितायाः विविधमन्त्रे 'अरंकृताः' , 'अरंकृतिः' आदि पदादि प्रयोगं दृश्यते। अपि च "वायवायाहि दर्शतेमे सोमा अरंकृताः" , (ऋग्वेद-1.2.1)," का ते अस्त्यरंकृतिः" (ऋग्वेद-7.29.3)। रामायणम् , महाभारतम् अपि ग्रन्थे 'अलंकारः' शब्दस्य प्रयोगं दृश्यते। यथा— "कृत्वालंकारमात्मनः" (अयोध्याकाण्ड - 40/13) , "अलंकृतैः शुभैः शब्दैः" (आदिपर्व – 1/28)। रुद्रदामनस्य शिलालेखे अपि अलंकारस्य प्रयोगं दृश्यते।

यद्यपि भरताचार्यः रसप्रस्थानस्य प्रतिष्ठापकः तथापि नाट्यशास्त्रे यमक-अनुप्रास-उपमा-दीपकानामलंकारणां विषये आलोचितवान्। ध्वनिवादी आचार्य्याः साहित्येऽपि अलंकारस्य व्यवहारः कृतवन्तः। एतेन प्रतीयते यत् अलंकारशास्त्रे प्राचीनता व्यापकता च दृश्यते। सर्वेषां शास्त्राणां अन्तःनिहिता अर्थः अलंकारशास्त्रे वर्णिता अस्ति। अतः अलंकारशास्त्रं नाम पुरुषार्थप्रतिपादकं स्वरूपम्। उच्यते—

"चतुवर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरुपं निरुप्यते ।।"[2]

अलंकारशास्त्रस्य पर्य्यायवाचकाः शब्दाः काव्यशास्त्र-सौन्दर्य्यशास्त्र-क्रियाकल्प-साहित्यशास्त्रादयः इति प्राचीन व्यवहारात् ज्ञायते। साहित्यशास्त्रस्य अलंकारशास्त्रनाम्ना प्रसिद्धिः। प्रथमतया आचार्यः भामहः स्व-ग्रन्थे अलंकारस्य नामकरणं कृतवान्। अलंकारशास्त्रपरम्परायां भरत-दण्डि-भामह-वामनोद्भट-रुद्रट-राजशेखर-आनन्दवर्धन-अभिनवगुप्त-धनञ्जय-कुन्तक-भोज-मम्मट -विश्वनाथ-अप्पयदीक्षित-जगन्नाथादयः सर्वे आलंकारिकाः तेषां मतानुसारेण अलंकारग्रन्थान् रचयामासुः।

अलंकारशास्त्रे विशिष्टाः आलंकारिकाः परिचयः

सुप्राचीनकालादेव संस्कृतालंकारिकैः साहित्ये अलंकाराणां गौरवयुक्तमेव स्थानम् उद्घोषितम्। संस्कृतालंकारशास्त्रे बहवः आलंकारिकाः सन्ति तेषां अलंकारशास्त्रे कीदृशं स्थानं इति विचार्यते। अलंकारशास्त्रपरम्परायां भरत-दण्डी-भामह-उद्भट-वामन -अग्निपुराण-रूद्रट-आनन्दवर्धन-राजशेखर-धनञ्जय-कुन्तक-महिमभट्ट-भोज-क्षेमेन्द्र-मम्मट-रुय्यक-जयदेव-विश्वनाथ-अप्पयदीक्षित-पण्डितराज जगन्नाथादयः आलंकारिकाणां परिचयः विषये अहं संक्षेपेण आलोचयामि।

अलंकारशास्त्रस्य प्रमुखाचार्याः

१.भरतमुनिः — संस्कृतालङ्कारशास्त्रस्य सर्वप्रथमः आलंकारिकः भरताचार्यः आसीत्। अलंकारशास्त्रे यद्यपि रससम्प्रदायस्य प्रणेता तथापि अलंकारप्रस्थानेऽपि तस्य अवदानं दृश्यते। कालिदासादयः कवयः अभिनवगुप्तादयः काव्यशास्त्रादयः तस्य नाट्यशास्त्रकारत्वेन उल्लेखं कुर्वन्ति। अतः भरतमुनिः ऐतिहासिकः व्यक्तिः आसीत्। अतः मन्यते - भरतमुनिः कालिदासस्य समये आविर्भावः जातः। भासस्य अविमारकनाटके नाट्यशास्त्रस्य उल्लेखोऽस्ति। अतः भरतमुनेः स्थितिकालः ५०० ई. पूर्वमिति अनुमीयते।

२.दण्डिणः — पुरा संस्कृतकविषु स्वजीवनवृत्तलेखनस्य परिपाटी नासीत्। अतः राजशेखरोऽपि वारद्वयं दण्डिन नामोल्लखं कृतवान् यः कान्यकुब्जेश्वरस्य महेन्द्रपालस्य गुरुः खृष्टाब्दस्य दशमशताब्द्याः पूर्वार्द्धेऽभवत्। राजशेखरः कर्णाटकदेशजातां विजयां सरस्वतीसमामकथयत् शुक्लवर्णा तन्न युक्तम्। अनेन प्रतीयते यत् — सप्तमशताब्द्याः उत्तरार्द्धे मन्यते। अवन्तिसुन्दरीकथायां माध्यमेन दण्डिनः स्वजीवनवृत्तविषये किञ्चित् वृत्तान्तं ज्ञायते। तदनुसारं तस्य पिता वीरदत्तः माता च

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

गौरी आसीत्। तदनुसारं दण्डिनः महाकविभारवेः(६१०-६४५ ई.) मित्रमासीत्। इतिहासकाराणां मतेन काञ्चीशासको नरसिंहवर्मा एव काव्यादर्शे वर्णितः राजवर्मा वर्तते। दण्डिना अवन्तिसुन्दरीकथायां भास-सुवन्धु-वाणादीनाम् उल्लेखः कृतः। अतः दण्डिनः सप्तमशताब्दे प्रथमे भागे आविर्भावः जातः।

३.भामहः — अलंकारशास्त्रेतिहासे भरतात् परं भामहस्य आविर्भावः जातः। आचार्यभामहस्य जीवनवृत्तविषये ज्ञायते यत् — दक्षिणभारते प्राप्तं काव्यालंकारस्य पाण्डुलिप्यनुसारं सः दक्षिणात्यः आसीत्। परन्तु सर्वप्रथमं काश्मीरग्रन्थेषु भामहस्य नामोल्लेखेन तस्य काश्मीरे जन्मवृत्तान्तं प्रतीयते। दिङ्नागात् परं धर्मकीर्त्तेः प्रागेव (५००-६२० मध्ये) भामहस्य समयः। भामहः—

"प्रणम्य सर्वसर्वज्ञ मनोवाक्कायकर्मभिः।
काव्यालंकार इत्येष यथाबुद्धि विधास्यते।"[3]

तस्य वचनात् बौद्धधर्मावलम्बी इति केचनः कथयति। अतः जन्मकालविषये वहुमतभेदः दृश्यन्ते। तथापि खिष्टः पूर्व षष्ठ-सप्तमशतके भामहः आविर्भवति।

४. उद्भटः — अलंकारशास्त्रेषु आलंकारिकेषु उद्भटस्य स्थानम् अन्यतमः आसीत्। राज्ञः जयापीडस्य सभापण्डितः उद्भटः आसीत्। सः काश्मीरीयः ब्राह्मणः राज्ञः जयादित्यस्य सभापण्डितरासीत्। कल्हनस्य राजतरंगिण्यां तस्योल्लेखो विद्यते—

"विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः।।"[4]

अस्य राज्ञः शासनकालः ७७९ तः ८१३ खृष्टाब्दीयमासीत्। अतः उद्भटस्य समयकालः ८०० खृष्टाब्दे निर्धार्यते।

५. वामनः — काव्यशास्त्रे वामनस्य महत्वपूर्णं अवदानम् अस्ति। सः रीतिमार्गस्य प्रवर्तकः आसीत्। वामनः काश्मीरनगरस्य जयापीडस्य अमात्यः आसीत्। तत् विषये कल्हणः राजतरङ्गिण्याम् उक्तवान् —

"मनोरथः शंखदत्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः।।"[5]

राजशेखरः (६६०-६२० ई.) वामनः उल्लेखं कृतवान्। अतः वामनः अष्टशताब्द्या उत्तरार्द्धे नवमशताब्द्याश्च पूर्वार्द्धे अनुमीयते।

६.अग्निपुराणम् — प्राचीनभारतीयसाहित्ये पुराणानां महत्वमासीत्। अत्र भारतीय धर्म-संस्कृति-परम्पराणां संग्रहः वर्णनमस्ति। रुद्रटस्य पश्चाद् अग्निपुराणस्य काव्यशास्त्रीयभागस्य स्थापने तात्पर्यम् अस्ति। पुराणानां संख्या अष्टादशः सन्ति। एतेषु अग्निपुराणं स्थानं महत्वपूर्णं वर्तते। अग्निपुराणे ३३७ अध्यायत् ३३७ तमम् अध्यायं यावत् काव्यशास्त्रसम्बन्धिविषयाणां संकलनं विद्यते। भारतीय परम्परानुसारम् अष्टादशपुराणां लेखकः महर्षि वेदव्यासः। अद्यावधि पुराणस्य कालः विषये सम्यक् निर्णेतुं कोऽपि न शक्नोति।

७.रूद्रटः — वामनात् परं रूद्रटाचार्यः आविर्भवति। रूद्रटः काश्मीरप्रदेशे अजायत। तस्य वंशपरिचयः विषये एक श्लोकः दृश्यते —

"शतानन्दपरारूपेन भट्टवामुकसूनुना।
साधितं रुद्रटेनेदं सामाजाधीमतां हितम्।।"[6]

राजशेखरः काव्यमीमांसां ग्रन्थे रुद्रटस्य नामोल्लेखः कृतवान्। अतः रुद्रटः राजशेखरात् प्राचीनः इति ज्ञायते। राजशेखरस्य कालः भवति ८८०तः ९२० शताब्दी इति। अतः रूद्रटः स्थितिकालः नवमशताब्दयाः पूर्वार्धे अनुमीयते।

८.आनन्दवर्धनः — प्राचीन भारतीय काव्यतत्त्वे "ध्वनिप्रस्थानः" विशिष्ट मर्यादायां प्रतिष्ठितम्। संस्कृत अलंकारशास्त्रस्य इतिहासे आनन्दवर्धनः ध्वनिप्रस्थानस्य प्रवर्तकः आसीत्। साहित्यस्य साररुपेण ध्वनितत्त्वं स्थापनाय आनन्दवर्धनः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

"धन्यालोकः" रचितवान्। आनन्दवर्धनः नवम शतके आविर्भावः जायते। स काश्मीरराज अवन्तिवर्मणः सभापण्डितः आसीत्।

९.राजशेखरः — राजशेखरः निजपरिचयः स्वग्रन्थे प्रकाशितम्। स कान्यकुब्जनरेशस्य महेन्द्रपालस्य गुरुः आसीत्। स यायावरकुले अजायत। तत् विषये काव्यमीमांसायाम् उक्तवान् —

"यायावरीयः संक्षिप्यः मुनीनां मतविस्तरम्।
व्याकरोत् काव्यमीमांसां कविभ्यो राजशेखरः।।"[7]

राजशेखरः प्रकृत्या स्वाभिमानी आसीत्। वालरामायणे स आत्मानां वाल्मीकिप्रभृतीनां कवीनाम् अवतारं घोषितवान्। राजशेखरः स्थितिकालः दशमशतकस्य आसीत्।

१०.कुन्तकः — कुन्तकः स्वपरिचयविषये न किञ्चित् सङ्केतितवान्। अयं काश्मीरिको विद्वानिति केषाञ्चन मतम्। अतः कुन्तकस्य समयः दशमशताब्याः अन्तिमभागे एकादशशताब्याश्च आदिमे भागे स्वीक्रियते। कुन्तकः प्रत्यभिज्ञादर्शनस्य अनुयायी आसीत्। कुन्तकसमये काश्मीरे शैवागमस्य व्यापकप्रचारः आसीत्। वक्रोक्तिजीवितस्य परिशीलनेन ज्ञायते यत् कुन्तकः यथार्थप्रिय आसीत्।

११.महिमभट्टः — महिमभट्टः काश्मीरप्रदेशे अजायत। महिमभट्टस्य स्थितिकालः एकादशशताब्याः पूर्वार्धे स्वीक्रियते।

१२.क्षेमेन्द्रः — एकादशशतकस्य काश्मीरीय पण्डितः तथा आलंकारिकः क्षेमेन्द्रः आसीत्। तस्य काव्यं प्रायेण उपदेशात्मकं वर्तते।

१३.मम्मटः — आलंकारिकेषु काव्यशास्त्रेषु मम्मटस्याभिधानं गौरवपूर्णं स्थानमावहति। काश्मीरदेशोद्भवस्य सरस्वतीदेव्या अवतारस्य मम्मटस्य पिता जैयटः आसीत्। मम्मटाचार्यः एकादशशतके आविर्भावः जातः। तस्याविर्भावेन संस्कृतलंकारशास्त्रे नवयुगस्य सूचना अभवत्।

१४.रुय्यकः — अलंकारसम्प्रदायस्य विकासे रुय्यकस्य महत्वपूर्णम् अवदानं वर्तते। रुय्यकः जयसिंहस्य मङ्खस्य गुरुरासीत्। अतः तस्य स्थितिकालः द्वादशशताब्दयाः पूर्वार्धभागः आसीत्। रुय्यकस्य अपरः नाम रुचकः।

१५.जयदेवः — जयदेवः विदर्भे कुण्डिनपुरे कौण्डिन्यगोत्रे जन्म प्राप्तवान्। तस्य पितरौ महादेवः सुमित्रा च आसीत्। ऐतिहासिकाः मन्यन्ते जयदेवस्य स्थितिकालः त्रयोदशशताब्यां आसीत्।

१६. विश्वनाथकविराजः — विश्वनाथः उत्कलप्रदेशे ब्राह्मणकुले जन्मं लेभे। तस्य प्रपितामहः नारायणः चण्डीदासः , चन्द्रशेखरश्च पिता आसीत्। विश्वनाथः विष्णुभक्तः आसीत्। चतुर्दशशतकस्य ख्यातनामा विदग्धः काव्यतत्त्वविदः विश्वनाथः आविर्भावः आसीत्।

१८.जगन्नाथः — अलंकारशास्त्रे पण्डितराज-जगन्नाथस्य महत्स्थानं विद्यते। मुगलशासकस्य शाहजाहसम्राजः समये जगन्नाथः आविर्भवति। तस्य पिता प्रेरुभट्टः , माता लक्ष्मी देवी आसीत् —

"पाषाणादपि पीयूष स्यन्दते यस्य लीलया।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्।।"[8]

एवं कथ्यते यत् पण्डितराजजगन्नाथः जयपुरे संस्कृतपाठशालामस्थापयत्। पण्डितराजजगन्नाथः दाक्षिणात्यः तैलङ्गब्राह्मण आसीत्। सप्तदशशतके पण्डितराजजगन्नाथः आविर्भावः जातः।

अलंकाराणां स्वरूपं वैचित्र्यं वा

'अलंकारः' संज्ञा अतिशयेन प्रचलिता प्रसिद्धा च वर्तते। भरतः तह पण्डितराजजगन्नाथः पर्यन्त स्वस्वग्रन्थे अलंकारसंज्ञा प्रयुक्ता। अलंकारशास्त्रसंज्ञायाम् 'अलंकारः'शब्दः सौन्दर्यवाचक इति उच्यते। अलङ्काराः काव्यशरीरभूतयोः शब्दार्थयोः चमत्कारस्य सौन्दर्यस्य वा आधानं कुर्वन्ति। कालानुसारे अहम् आलंकारिकाणां 'अलंकारः' स्वरुपं विषये क्रमानुसारेण आलोचयामि।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

१.भरताचार्यःनाट्यशास्त्रे अलंकारस्य स्वरुपं विषये अभिमतम् — भरतः तस्य नाट्यशास्त्रे चत्वारः अलंकाराः स्वीकृता , किन्तु अलंकारस्य स्वरूपं विषये कोऽपि न उक्तवान्। परन्तु 'अलंकारः' प्रसङ्गे 'भूषणः' इति प्रयोगं कृतवान्। अतः उच्यते —

"अलंकारैर्गुणैश्चैव वहुभिः समलङ्कृतम्।
भूषणैरिव चित्रार्थैस्तद् भूषणमिति स्मृतम्।।"

अलंकाराः गुणाः च काव्यस्य भूषणानि सन्ति। यथा युवतेः शरीरं हारैः कुण्डलैः च भूषितं सत् शोभते, तथैव काव्यं वहुभिः अलंकारैः , गुणैः , विचित्रैः अर्थैः च सुशोभितं भवति।

२.काव्यादर्शे आचार्य दण्डीमहोदयस्य अलंकारस्वरूपं विषये अभिमतम् — आचार्य दण्डी यद्यपि गुणप्रस्थानस्य प्रवर्तकः तथापि सः अलंकारस्य लक्षणं विषये उक्तवान् —

"काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते।
ते चाद्यापि विकल्पन्ते कस्तान् कार्तस्न्येन वक्ष्यति।।"

ये धर्माः काव्यस्य शोभाम् उत्पादयन्ति , ते धर्माः अलंकाराः इति आलङ्कारिकैः प्रचक्षते। यथा — कामिन्याः शरीरं हार-नूपुर-केयूरादिभिः भूषणैः शोभते, तथैव काव्यशरीरम् अपि अनुप्रास-उपमा-रुपकादिभिःधर्मैः शोभते। अतः ते धर्माः एव अलङ्काराः इति उच्यन्ते।

३. भामहाचार्यः मते अलंकारस्य स्वरूपम् — अलंकारशास्त्रे षड्रस्तानानि सन्ति। षड्रस्थानेषु अलंकारप्रस्थानस्य प्रवर्तकः भामहाचार्यः आसीत्। सः अलंकारस्वरुपं विषये उक्तवान् —

"अलंकारैः गुणैश्चैव वहुभिः समलंकृतम्।
भूषणैरिव चित्रार्थैस्तद्भूषणमिति स्मृतम्।।"

अर्थात् वहुभिः अलंकारैः गुणैः विचित्रार्थैः च युक्तं काव्यं भूषणालंकारयुक्तं भवति। यथा भूषणैः नारी शोभते , तथा अलंकारगुणैः काव्यं शोभते इति।

४.उद्भटः मते अलंकारस्य लक्षणं विषये अभिमतम् — आलङ्कारिकेण उद्भटाचार्येण मते अलंकारस्य स्वरुपं यथा —

"चारुत्वहेतुरलङ्कारः।"

चारुत्वहेतुः अलंकारः इति वचनं अलंकारशास्त्रस्य बीजमन्त्रः। चारुत्वं नाम – सहृदय-हृदये चमत्कारः उत्पादकत्वम्। येन पद्यं श्रुत्वा सहृदयस्य मनसि अहो सुन्दरम् इति आनन्दः जायते , तत् चारुत्वम्।

५.वामनाचार्यः काव्यालंकारसूत्रवृत्तिः ग्रन्थे अलंकारस्य स्वरूपं विषये उक्तवान् —

"काव्यशोभायाः कर्तारोधर्मा गुणाः तदतिशयहेतवस्त्वलंकाराः।"

गुणाः काव्ये शोभाम् उत्पादयन्ति, अलंकाराः तां शोभां वर्धयन्ति। गुणाः विना काव्यं न जीवति, अलंकाराः विना काव्यं शोभते , परं न अतिशयेन शोभते।

६.अग्निपुराणे अलंकारः विषये प्रतिपादितं यत् — अलंकारवादिनः आचार्याः अलंकारस्य महत्त्वं वर्णयन्ति। अग्निपुराणे अलंकारः विषये अभिमतम् —

"तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्।
अर्थालङ्काररहिता विधेवेन सरस्वती।।"

इदं पद्यम् अर्थालंकारस्य अपरिहार्यतां प्रतिपादयति। अलंकारं विना शब्द-सौन्दर्यं मनोहरं न भवति। अर्थालंकारं विना विधवा नारी इव अशोभना भवति। अतः काव्ये अलंकारः अत्यावश्यकः। अलंकारः एव काव्यस्य प्राणः।

७.रुद्रटः मते अलंकारस्य लक्षणं यथा —

"अस्य हि पौर्वापर्यं पर्यालोच्याऽचिरेण निपुणस्य।
काव्यमलंकर्तुमलं कर्तुरुदाय मतिर्भवति।।"

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

इदं पद्यम् अलंकारशास्त्राध्ययनस्य प्रयोजनं फलं च प्रतिपादयति। अलंकारग्रन्थस्य पूर्वापर-क्रमं सम्यक् निपुणस्य कवेः बुद्धिः शीघ्रम् एव काव्यं अलंकर्तुं समर्था जायते। अर्थात् अलंकारशास्त्राध्ययनेन कवित्व-शक्तिः वर्धते।

८. आनन्दवर्धनाचार्यः अलंकारस्वरूपं विषये अभिमतम् — आनन्दवर्धनाचार्यः यद्यपि ध्वनिप्रस्थानस्य प्रवर्तकः तथापि अलंकारस्वरूपस्य विषये उक्तवान् —

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः।।"

अत्र आनन्दवर्धनाचार्यः ध्वनिकाव्ये अलंकारस्य किं स्वरुपं भवेत् इति कथयति। कविः यदा रसं वर्णयति, तदा यदि अलंकारः स्वतः आयाति , तर्हि सः अलंकारः सुन्दरः। कविः यदि अलंकारस्य पृथक् यत्नं न करोति, तर्हि सः उत्तमकाव्यः। अतः ध्वनिकाव्ये सः एव अलंकारः ग्राह्यः , यः रसेन सह स्वतः सिद्धः भवति।

९.राजशेखरः मते अलंकारलक्षणस्य अभिमतम् — आचार्यराजशेखरः तस्य विरचितं 'काव्यमीमांसा' इति ग्रन्थे अलंकारस्वरूपं विषये उक्तवान् —

"उपकारकत्वाद् अलंकारः सप्तमम् अङ्गम् इति यायावरीयः।
ऋते च तत्स्वरुपपरिज्ञानाद् वेदार्थानवगतिः।।"

अत्र आचार्यराजशेखरः अलंकारशास्त्रस्य महत्त्वं प्रतिपादयति। सः कथयति अलंकारशास्त्रं वेदस्य उपकारकत्वात् सप्तमम् अङ्गम्। अलंकारज्ञानं विना वेदस्य यतार्थ-अर्थः ज्ञातुं न शक्यते।

१०.धनञ्जयः मते अलंकारस्य लक्षणं यथा —

"अलंकारो हि चारुत्वहेतुः , रसोपकारकः , न तु रसात्मकः।"

अर्थात् अलंकारः काव्यस्य सौन्दर्य-हेतुः अस्ति। सः रसस्य उपकारकः अस्ति , सहायकः अस्ति , परन्तु सः स्वयं रसः नास्ति। रसः आत्मा , अलंकारः भूषणम्।

११.आलंकारिकः कुन्तकः अलंकारस्य लक्षणं विषये प्रतिपादयति — अलंकृतिः नाम वक्रोक्तिः। कुन्तकाचार्यः मते अलंकारस्य स्वरुपं यथा —

"अलङ्कृतिः वक्रोक्तिः एव वैदग्ध्यभङ्गीभणितिः उच्यते।"

कुन्तकाचार्यमते काव्यस्य आत्मा वक्रोक्तिः एव। वक्रोक्तिं विना काव्यं न भवति। उपमादयः सर्वे अलंकाराः वक्रोक्तौ एव अन्तर्भवन्ति।

१२.क्षेमेन्द्रः औचित्यविचारचर्चा ग्रन्थे अलंकारस्य लक्षणं विषये उक्तवान् —

"अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।"

अलंकारः भूषणमात्रम् , गुणः धर्ममात्रम्। परन्तु काव्यस्य वास्तविकं जीवितं नाम औचित्यम्। रस-भङ्गं विना यत् भवति तत् औचित्यम्।

१३.मम्मटाचार्यस्य मते अलंकारस्वरुपस्य अभिमतम् — मम्मटाचार्यः काव्यप्रकाशे नवमोल्लासे अलंकारस्वरुपस्य विषये उक्तवान् —

"ये रसस्याऽङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्ष हेतवस्तेस्युरचलस्थितयो गुणाः।
उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः।।"

अर्थात् गुणाः रसस्य आत्मधर्माः , नित्याः। अलंकाराः शब्दार्थयोः धर्माः , अनित्याः। हारवत् बाह्य-शोभाकारकाः। गुणैः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

रसः जीवति, अलंकारैः रसः शोभते।

१४.जयदेवः चन्द्रालोकः ग्रन्थे अलंकारस्य लक्षणं प्रतिपादयति — अलंकारः एव काव्यस्य प्राणः। अलंकारं विना काव्यम् एव न भवति। आलंकारिकः जयदेवः उक्तवान्—

"अङ्गीकराते यः काव्यं शब्दार्थवनलङ्कृती।
असौ न मन्यते कस्यादनुष्णामनलं कृती।।"

अर्थात् यथा उष्णता विना अग्निः न भवति, तथा अलंकारं विना काव्यं न भवति। अतः अलंकारः काव्ये आवश्यकः। यः अनलंकृतं काव्यं स्वीकरोति , सः शीतलम् अग्निम् अपि स्वीकरोति।

१५.पण्डितराजजगन्नाथः प्रतिपादितः अलंकारस्वरुपम् —

"काव्यात्मनः व्यङ्गस्य रमणीयताप्रयोजकाः अलंकाराः।।"

काव्यस्य शोभा नाम शब्दार्थयोः शोभा। अतः ये धर्माः तस्य आत्मभूतस्य व्यङ्ग्यस्य रमणीयतां कुर्वन्ति, ते एव अलंकाराः। उपमा-रुपकादयः अलंकाराः साक्षात् शब्दार्थं भूषयन्ति , परम्परया व्यङ्ग्यं अपि भूषयन्ति। अतः ते अलंकाराः।

१६.साहित्यदर्पणकारः विश्वनाथः मते अलंकारस्वरूपस्य अभिमतम् — विश्वनाथकविराजः साहित्यदर्पणे दशम-परिच्छेदे अलंकारं लक्षयति —

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।।"

अर्थात् ये धर्माः शब्दे च अर्थे च तिष्ठन्ति , परन्तु अनित्याः , काव्यशोभां वर्धयन्ति , रसस्य उपकारं कुर्वन्ति , हारादि-भूषणवत् भवन्ति , ते अलंकाराः इति उच्यन्ते।

१७.पण्डितराजजगन्नाथः प्रतिपादितः अलंकारस्वरुपम् —

"काव्यात्मनः व्यङ्गस्य रमणीयताप्रयोजकाः अलंकाराः।।"

काव्यस्य शोभा नाम शब्दार्थयोः शोभा। अतः ये धर्माः तस्य आत्मभूतस्य व्यङ्ग्यस्य रमणीयतां कुर्वन्ति, ते एव अलंकाराः। उपमा-रुपकादयः अलंकाराः साक्षात् शब्दार्थं भूषयन्ति, परम्परया व्यङ्ग्यं अपि भूषयन्ति। अतः ते अलंकाराः।

१८.अप्पयदीक्षितः अलंकारस्य लक्षणं विषये उक्तवान्—

"काव्यशोभाकरा धर्मा अलङ्काराः।
रसाद्युपकारकाः चमत्कारहेतवः।।"

अर्थात् यः काव्यस्य शोभां करोति, रसस्य उपकारं करोति , हृदये चमत्कारं जनयति, सः धर्मः अलंकारः इति उच्यते।

उपसंहारः – काव्यस्य सौन्दर्यं वर्धयितुं तस्य सुन्दरतरं कर्तुं च अलङ्कारानाम् आवश्यता अवश्यमेव भवति। यथा शरीरस्य सौन्दर्यं वर्धयितुं अलंकारानाम् आवश्यकता भवति, तथा काव्यस्य सौन्दर्यं वर्धयितुं अलंकारानाम् आवश्यकता भवति। आलंकारिकाः स्वालंकारपुस्तकेषु ये अलंकाराः प्रयुक्ताः ते एव काव्यनाटकयोः सुन्दरीकरणाय नाटककाराः साहित्यिकाः च स्वपुस्तकेषु प्रयुक्ताः। ते अलंकाराः काव्यस्य सौन्दर्यं वर्धयन्ति, पाठकं काव्यपठने रुचि जनयन्ति, काव्यस्य अर्थं च उत्कर्षं कुर्वन्ति। अलंकाराः काव्यभाषां अधिकं सामञ्जस्यपूर्णं, लयात्मकं, सार्थकं च कुर्वन्ति। अलंकारः ज्ञानेन काव्यस्य रसोत्कर्षं वर्धयति, काव्यस्य सौन्दर्यं वर्धयति।

Endnotes

1. नीतिशतकम् – 12
2. काव्यालङ्कारः – 1/2
3. काव्यालङ्कारः – 1/1

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

4. राजतरङ्गिनी – 4/495
5. राजतरङ्गिनी – 4/497
6. काव्यालङ्कारः – 16/37
7. काव्यमीमांसा – 1/7
8. रसगङ्गाधरः – 1/3

Bibliography

- अलङ्कारशास्त्रोपकण्ठम्,डा.वेङ्कटरमणभट्टः,रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्,बेलुडमठम्
- अलङ्कारशास्त्रेतिहासः,डा.रामकुमार दाधीच,हंसा प्रकाशन,जयपुर
- अलङ्कारप्रस्थाने भामहस्य अवदानम् , डा. सञ्जय भट्टाचार्यः,संस्कृत पुस्तक भाण्डार,कलकाता
- संस्कृत अलङ्कार शास्त्र तत्त्व,धीरेन्द्रनाथ वन्दोपाध्यायः,पश्चिमवङ्ग राज्य पुस्तक पर्षत्,कलकाता
- अलङ्कार संग्रह, ड.सुमिता वटव्याल, संस्कृत पुस्तक भाण्डार,कलकाता
- संस्कृत काव्यशास्त्र का इतिहास,महामहोपाध्याय पी.वी.काणे,मोतीलाल बनारसीदास,पटना
- संस्कृत साहित्य का समालोचनात्मक इतिहास,डा.रामविलास चौधरी, मोतीलाल बनारसीदास,पटना
- काव्यालङ्कारः,श्रीनमिसाधु, मोतीलाल बनारसीदास,पटना
- साहित्यदर्पणः,विद्यावाचस्पति-साहित्याचार्य-शालिग्रामशास्त्रि, मोतीलाल बनारसीदास,पटना
- अलङ्कारसारः,प्रो.बृजेशकुमारशुक्लः,सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,वाराणसी
- काव्येष्वलङ्कारसन्निवेशनविधिः,डा.सोमनाथ दाशः,राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः
- अलङ्कार समीक्षा,डा.चन्द्रशेखर पुरोहितः,नाग प्रकाशकः,दिल्ली